# Shivapancharatnastuti

# શ્રીશિવપઞ્ચરત્નસ્તુતી શિવમહાપુરાણે

## Document Information

Text title : shivapancharatnastutiH shivamahApurANe

File name : shivapancharatnastuti.itx

Category : pancharatna, shiva

Location : doc_shiva

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : shrIshivamahApurANe chyutapurImAhAtmye shrIkRiShNa kRita

Latest update : March 7, 2014

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીશિવપઞ્ચરત્નસ્તુતી શિવમહાપુરાણે

શ્રીકૃષ્ણ ઉવાચ -
મત્તસિન્ધુરમસ્તકોપરિ નૃત્યમાનપદામ્બુજમ્ ।
ભક્તચિન્તિતસિદ્ધિદાનવિચક્ષણં કમલેક્ષણમ્ ।
ભુક્તિમુક્તિફલપ્રદં ભવપદ્મજાઽચ્યુતપૂજિતમ્ ।
કૃત્તિવાસસમાશ્રયે મમ સર્વસિદ્ધિદમીશ્વરમ્ ॥ ૧॥

વિત્તદપ્રિયમર્ચિતં કૃતકૃચ્છ્રતીવ્રતપશ્ચરૈઃ ।
મુક્તિકામિભિરાશ્રિતૈર્મુનિભિર્દૃઢામલભક્તિભિઃ ।
મુક્તિદં નિજપાદપઙ્કજસક્તમાનસયોગિનામ્ ।
કૃત્તિવાસસમાશ્રયે મમ સર્વસિદ્ધિદમીશ્વરમ્ ॥ ૨॥

કૃત્તદક્ષમખાધિપં વરવીરભદ્રગણેન વૈ ।
યક્ષરાક્ષસમર્ત્યકિન્નરદેવપન્નગવન્દિતમ્ ।
રક્તભુગ્ગણનાથહૃદ્ભ્રમરાઞ્ચિતાઙ્ઘ્રિસરોરુહમ્ ।
કૃત્તિવાસસમાશ્રયે મમ સર્વસિદ્ધિદમીશ્વરમ્ ॥ ૩॥

નક્તનાથકલાધરં નગજાપયોધરનીરજા-
લિપ્તચન્દનપઙ્કકુઙ્કુમપઙ્કિલામલવિગ્રહમ્ ।
શક્તિમન્તમશેષસૃષ્ટિવિધાયકં સકલપ્રભુમ્ ।
કૃત્તિવાસસમાશ્રયે મમ સર્વસિદ્ધિદમીશ્વરમ્ ॥ ૪॥

રક્તનીરજતુલ્યપાદપયોજસન્મણિનૂપુરમ્ ।
પત્તનત્રયદેહપાટનપઙ્કજાક્ષશિલીમુખમ્ ।
વિત્તશૈલશરાસનં પૃથુશિઞ્જિનીકૃતતક્ષકમ્ ।
કૃત્તિવાસસમાશ્રયે મમ સર્વસિદ્ધિદમીશ્વરમ્ ॥ ૫॥

॥ ફલશ્રુતિઃ॥

યઃ પઠેચ્ચ દિને દિને સ્તવપઞ્ચરત્નમુમાપતેઃ ।

પ્રાતરેવ મયા કૃતં નિખિલાઘતૂલમહાનલમ્ ।
તસ્ય પુત્રકલત્રમિત્રધનાનિ સન્તુ કૃપાબલાત્ ।
તે મહેશ્વર શઙ્કરાખિલ વિશ્વનાયક શાશ્વત ॥ ૬॥

॥ ઇતિ શ્રીશિવમહાપુરાણે ચ્યુતપુરીમાહાત્મ્યે શ્રીકૃષ્ણ કૃત
શ્રીશિવપઞ્ચરત્નસ્તુતિઃ સમ્પૂર્ણમ્ ॥

Encoded and proofread by PSA Easwaran

*Shivapancharatnastuti*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*